Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# सोमनाथदाशविरचितस्य वंशीविनोदशतकाव्यस्य सामाजिकमध्ययनम्

विलता वर्मन्
शोधच्छात्री, संस्कृतविभाग:
माहात्मागाँधीकेन्द्रियविश्वविद्यालय:

**Article Info**
Volume 4, Issue 6
Page Number : 32-38

**Publication Issue :**
November-December-2021
**Article History**
Accepted : 05 Nov 2021
Published : 30 Nov 2021

**सारांश:**– श्रीमद्भागवते श्रीकृष्णस्य वंश्या वैशिष्ट्यमाधारीकृत्य 'वेणुगीतम्' इति दशमसर्गस्य एकविंशतितमोऽध्याये वर्तते। स्तुतिमूलकं वा भक्तिमूलकं शतककाव्यमिदं श्रीकृष्णस्य वंशीमाधारीकृत्य कविना सोमनाथदाशमहाभागेन विरचितमस्ति। तत्र विद्यमान: सामाजिकपक्ष: इत्यस्य विचार: मया सुकुमारमतिना विचारित:।

**मुख्यशब्द:– श्रीकृष्ण:,** सामाजिक:, भक्ति:, वेणुगीतम्, सोमनाथदास:।

मनुष्य एक समाजवद्धजीव: भवति। समाजं विना स: जीवितुं न शक्नोति। समाज: नाम् समानधर्मस्थानं समुदाय: इति। तस्मात् छात्रसमाज: शिक्षकसमाज: कृषकसमाज इत्यादि व्यवहार: प्रवर्तते। समाजस्य चित्रं साहित्ये प्रतिफलितं भवति। साहित्यं च समाजस्य दर्पण: भवति। इति कथ्यते। यथा स्वच्छे, निर्मले, दर्पणे, कश्चित् स्वकीयां प्रतिकृतिं द्रष्टुं शक्नोति, तथैव सशस्ते साहित्ये तदानीन्तनसमाजस्य समुचितं चित्रं द्रष्टुं शक्यते।

सर्वत्रैव साहित्ये समाजस्य व्यावहारा: निरूपयन्ते तथा च सामाजिकविचाराणां चर्चा विधीयते। कविविरचितग्रन्थविशेषं विलोक्य काव्यरचनाकालिका: सामाजिकस्य स्थितत: तात्कलिका: सामाजिकचिन्तमयपरम्पराश्च विज्ञातुं शक्यन्ते। विषयाश्च चर्चावसरे सर्वत्र प्रथमं संस्कृतसाहित्यत्थो: सम्बन्धो विचार्यते।

## समाजशब्दार्थ:

**शमानी प्रपा सहवोन्नभाग : समायुक्त्रे सह वो युनज्मि। सम्यञ्चोग्नि समर्यतारा ताभिमिवामित:** इति अर्थवेदस्य वचनानुसारं समाजस्य आकारं विवृणुते। साधारणत: समाज इति शब्दश्रवणनैव मनसि प्रश्न: समायाति यत् कोऽयं समाज: इति। अतोच्यते मानवानां समूह: समाज: इति। तत्र च सम् + अच+घञ् इति व्याकरणव्युत्पत्या समाज इति शब्द: निष्पद्यते। वैदिककाले भारतीयानां जीवनं सामाजिकमासीत्। सामाजिकभावनाया: प्रारम्भ: विकासश्च परिवारेव भवति। तत्र समाजे चत्वारवर्णा: दृश्यन्ते। तदुक्तं गीतायाम् –

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**[1]

अतः एतेषां वर्णानां कृते तत्र समाजे चत्वारः वर्णव्यवस्था अपि कल्पिताः। यथा ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः तथा सन्यासाश्रमश्च। अतः वर्गव्यवस्थायां वर्णानां माहात्म्यं भजते। अतः वर्णव्यवस्थाविषये तथा वर्णाश्रमव्यवस्था विषये च भगवद्गीतायां नैके विचाराः दरीदृश्यते। तदित्थम् -

**का नाम वर्णव्यवस्था -**

वैदिककालादारभ्य भारतेऽस्मिन् वर्णव्यवस्था प्रसरीसर्ति। वर्णशब्देन किम् अभिप्रेतम् इति जिज्ञासायां वर्णो वृणोतिः (निरुक्त)। मानवः स्वजीवन-निर्वाहार्थं यां कामपि वृत्तिम् आश्रयते, तदनुसारमेव तस्य वर्णनिर्णयः। प्रवृत्ति वैविध्यम् अनुरुध्य मानवशरीर-समालोचनपूर्वकं चातुर्वर्ण्यव्यवस्था प्रवर्तिता। मानवशरीरं चतुर्धा विभक्तुं शक्यते - 1.शिरोभागः ज्ञानेन्द्रियमनोबुद्धिसमन्वितः,2.हस्तौ ग्रहणं दानादान-रक्षण-साधनभूतौ,3. उदरप्रधानो मध्यभागः, पचनक्रियासम्बद्धोऽशितमन्नं रक्तादि रुपेण परिवर्त्य शरीरस्थितिसाधकश्च,4.पादों, गमनागमनादिसाधको शरीरस्थितिप्रवत्तिप्रवर्तकौ च। एवमेव राष्ट्र समाजोऽपि चतुर्धा विभज्यते। यथा -1.ब्राह्मणो ज्ञानकार्य-सम्बद्ध 2. क्षत्रियो रक्षाकार्यसम्बद्धः, 3. वैश्यः कृषिवाणिज्यादिसम्बद्धः,4.शूद्रः शुश्रूषाकार्यसम्बद्धश्च। एतदेवाभिप्रेत्या यजुर्वेदे (यजुवेदः,31-11)चातुर्वण्यम् उल्लिख्यते -

**ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।**

**ऊरुः तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत**[2]**।।**

**गीतायां वर्णव्यवस्था** -

श्रीमद्भगवद्गीतायामपि वर्णव्यवस्थाविषये सुविस्तृतरूपेण सुस्पष्टश्च भगवता श्रीकृष्णेनोक्तम्। तेषां वर्णानां विभागीकरणं कर्मणामाधारेणैव भवति। उक्तं यत् चतुर्थोऽध्यायस्य त्रयोदशश्लोके -

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।**

**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्।।**

तेषां चतुर्णां वर्णानां कर्मभेदविषयेऽपि गीतायां सारल्येन वर्णितमस्ति।

**ब्राह्मणस्य कर्तव्यम् -**

गीतायां मनुस्मृतौ च ब्राह्मणस्य कर्तव्यं निर्दिश्यते यद् अध्ययनम्, अध्यापनम्, यजनम्, याजनम्, दानम्, प्रतिग्रहः, शम-दम-शौच-क्षान्ति-क्षमा-आर्जवादि-गुणयुक्तत्वम्, ज्ञान-विज्ञानयोः समुत्कृष्टत्वं च ब्राह्मणस्य कर्तव्यम्। तदाह गीतायाम् -

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**

**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।**[3]

---

[1]. 4.13

[2]. ऋग्वेद -10.90

[3]. 18.42

मनुस्मृतौ यथा

**अध्यापनमध्ययनं यजनं याजनं तथा।**

**दानं प्रतिग्रहश्चैव ब्राह्मणानामकल्पयत्।।[4]**

**क्षत्रियस्य कर्तव्यम् -**

प्रजानां संरक्षणम्, दानम्,यजनम्, अध्ययनम्, विषयेष्वनासक्तिः , शौर्यम्, धैर्यम, दाक्ष्यम, युद्धेऽपलायनम्, दानम्, प्रभुत्वं च क्षत्रियाणां कर्तव्यम् अवधार्यते। तदाह गीतायाम् –

**शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।**

**दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्।।[5]**

**मनुस्मृतौ यथा-**

**प्रजानां रक्षणं दानमिज्याऽध्ययनमेव च।**

**विषयेष्वप्रसक्तिश्च क्षत्रियस्य समादिशत्।।[6]**

महाकविना कालिदासेन –

**क्षतात् किल त्रायत इत्युदनः क्षत्रस्य शब्दो भुवनेषु रुढः** [7] इत्यत्र क्षतेः विपदो वा रक्षणं क्षत्रियस्य कर्तव्यमित्यभिधीयते।

**वैश्यस्य कर्तव्यम् -**

वैश्यस्य कर्तव्यं निर्दिश्यते – पशूनां रक्षणम्, दानम्, यजनम्, अध्ययनम्, व्यापारः, वाणिज्यम्, कुसीदवृत्तिः कृषिश्चेति। मनुस्मृतौ यथा–

**पशूनां रक्षणं दानमिज्याऽध्ययनमेव च।[8]**

गीतायां यथा प्रोक्तम्–

**वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च**

**कृषिगौरक्ष्य वाणिज्यं वैश्यकर्म स्वभावजम्।[9]**

**शूद्रस्य कर्तव्यम् –**

शूद्रस्य शिल्पकार्यम्, सर्वेषां वर्णानां च शुश्रूषणं कर्तव्यम् अभिधीयते। मनुस्मृतौ यथा–

**एकमेव तु शुद्रस्य प्रभुः कर्म समादिशत्।[10]**

गीतायां प्रोक्तं यथा–

---

4. 88
5. 18.43
6. 89
7. रघुः 2–53
8. 91
9. 18.41
10. 92

**सर्वेषामेव वर्णानां शुश्रूषामनसूयया।।**

**परिचर्यात्मकं कर्म शुद्रस्यापि स्वभावजम्।।**[11]

**वर्णव्यवस्थायाः उपयोगिता -**

वर्णव्यवस्था परीक्ष्यते चेद गीताया वचनमेतत् समर्थयते यत् चातुर्वर्ण्य गुणकर्मानुसारमेव प्रवृत्तम्। विभाजनस्य कारणं किम् ? कः आधारः इत्यनुयोगे प्रोच्यते यद् मानवेषु केचन नैसर्गिकाः सहजाश्च गुणदोषा उपलभ्यन्ते। तन्मूलकमेव प्रवृत्तिवैविध्यम्। प्रवृत्तिभेदाच्च वृत्तिभेदाः। वृत्तिभेदाच्च वर्णभेदः। वर्णभेदाच्च क्रियाभिन्नत्वम्। अतएव गीतायां निगद्यते –

**ब्राह्मणक्षत्रियविशां शुद्राणां च परन्तप।**

**कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः।।**[12]

दार्शनिकदृष्ट्या, मनोवैज्ञानिकदृष्ट्या, वैज्ञानिकदृष्ट्या च समाजः पर्यालोच्यते चेत् तर्हि चतुर्विधा प्रवृत्तिमानवानां संलक्ष्यते। 1.सत्त्वप्रधाना, 2.सत्त्वरजोमिश्रिता, 3.रजस्तमोमिश्रिता, 4.तमः प्रधाना च। प्रकृते गुणत्रयात्मकत्वात् प्रकृतिविकृतावापि गुणत्रयसमन्वयो निर्विवादः। सत्वं लघु प्रकाशकम् इति (सांख्यकारिका –23)। एवं ये सत्वगुणोपेता ज्ञानविज्ञानप्रवणा आध्यत्मिकताआस्तिक्यादिगुणसम्बिताश्च ते ब्राह्मणाः। उपष्टम्भकं चलं च रजः (सांख्यकारिका –13)। रजोगुणे प्रेरकत्वं क्रियाशीलत्वञ्च। अतो ये सत्त्वरजोमिश्रितास्ते क्षत्रियाः। गुरु वरणकमेवनमः (सांख्यकारिका –13)। तमोगुणे आवरकत्वं क्रियारहित्यं च। एवं ये रजस्तमोमिश्रितास्ते वैश्याः। ये सर्वथा तमः प्रधानास्ते शूद्राः। एवं दार्शनिकदृष्ट्या वर्णव्यवस्तायाः औचित्यं सुव्यवस्थितत्वं चावगम्यते। अतएव गीतायां प्रतिपाद्यते यद् नहि लोके किञ्चिद् वस्तु गुणत्रयव्यपेतम्। सर्वं त्रिगुणात्मकमेव। तच्चाह गीतायां यथा–

**न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः।**

**सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्रिभिर्गुणैः।।**[13]

**गुणकर्मानुसारं वर्णव्यवस्था -**

वर्णव्यवस्था परीक्ष्यते चेत् सा गणकर्णानुसारं प्रावर्तत। यः कश्चन तत् कम कुयात्सत वर्णम् आश्रयेत्। स्वकर्मणैव ब्राह्मणो वैश्यत्वं शूद्रत्वं चापद्यत। एवमेव सत्कामप्यनुरुध्य शूद्रोऽपि ब्राह्मणत्वं प्रपेदे। नहि वर्णव्यवस्था जन्मानुसारिणी जन्ममूला च। अतएव मनुना कर्मानुसार वर्षविपर्ययो निर्दिश्यते–

**शूद्रोब्राह्मणतामेति ब्राह्मणश्चेति शूद्रताम्।**

**क्षत्रियाज्जातमेवं तु विद्याद् वैश्यात् तथैव च।।**[14]

आपस्तम्ब धर्मसूत्रेऽप्येतदेव विशदीक्रियते यद धर्मचर्यया वर्णोत्कर्ष लभते, अधर्मचर्ययाच वर्णापकर्षम्। यथा प्रोच्यते आपस्तम्बे–

**धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ।**

**अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवत्तौ।।**[15]

---

11. 1.9
12. 18.41
13. 18.40
14. मनु 10–65
15. 1–2

गीतायाः वचनानि समकल्य अयं निष्कर्षः प्रस्तोतुं शक्यं यत् – सुस्थसमाजस्य निर्माणार्थ समाजेस्थितायाः वर्णव्यवस्थायाः प्राधान्यं भजते इति। यतोऽहि वर्णव्यवस्थायां विभिन्नां वर्णानां कृते वर्णव्यवस्थाः भिन्ना भिन्ना भवन्ति। तत्र च वर्णश्रमे तदवर्ण सम्बद्धः नियमाः अपि कल्पिताः वर्तन्ते। अतः सुस्थसमाजनिर्माणे वर्णाश्रमव्यवस्थायाः योगदानं भवेदेव इति।

**समाजनिर्माणे काव्यानां भूमिका**

संस्कृतिसामाजिकानां व्यवहारविशेषाणां समष्टिः हि वर्तते, साहित्यन्तु तेषां संस्कृतिकपदवाच्यानां मानवव्यवहारविशेषाणां चिरस्तायिनी मानवव्यवहारविशेषाणां चिरस्थायिनी कृतभिव्यक्तिविद्यते। तत्र सम उपसर्गपूर्वकात् कृ धातोः भावार्थे क्तिन् प्रत्यये कृते सति सम्परिभ्यां करौतौ भूषणे (6/2/237) इति सूत्रेण सुडि संस्कृतशब्दस्य निष्पत्तिर्भवति। भूषणात्मिका सम्यक् कृतिः संस्कृतिः एवञ्च "साहित्यस्य भावः साहित्यम्" इति निर्दिशन्तः शब्दशास्त्रविशारदाः परकाशितवन्तो यद्धि सहितशाब्दात् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (5.2.124) इति सूत्रेण ष्यञ् प्रत्ययकृते सति साहित्य शब्दो निष्पन्नो भवति। संस्कृतसाहित्यसम्बन्धोविषयकचर्चा प्रसङ्गे संस्कृतसाहित्यस्य च विभिन्नानां तत्वानां तथा साङ्गोपाङ्गानां परिचयस्यापेक्षा भवति। प्राणिनः सङ्घजीविनः भवन्ति। एकाकिना जीवनयापनं दुर्घटं भवत्येव। यथा पितामाताभ्राताकुटुम्बादीनां समुदायः अन्योन्यहितं चिन्तयति तथा कामवासिनः पट्टनवासिनो वा अन्योन्यहितकराः भवन्ति। अन्योन्यसाहाय्येन जीवनं सुलभं भवति। सम्यक् आजयति गमयति जीवनं इति अज गतौ इति धातोः घञ् प्रत्ययेन निष्पन्नोऽयं समाजः इति शब्दः। बहूनाम् एकत्र समानधर्माणां कृतानां निवासीनांसमुदायः समाजः इति वक्तुं शक्यते। समाजे इतरेषां क्लेशम् असौकर्यञ्च वारयितुं केचन सर्वानुष्ठेयाः विषयाः भवन्ति। तान् अनुष्ठाय पुरूषः समाजहितं कल्पते। अन्यथा समाजः तं द्वेष्टि। समाजात् पृथक् भूतं वस्तु अनर्हं भवति। संस्कृतभाषायाम् एकः चमत्कारो वर्तते। **समुदोरजः पशुषु** इति सूत्रेण अजधातो अप् – प्रत्ययेन समजः इतिरूपं निष्पाद्यते। तत्र समजः पशूनां सङ्घः इत्यर्थे व्यवहृतः। नियमहीनजीवनिः समजत्वेन परिगण्यते न तु समाजत्वेन। काव्यशास्त्रात् अस्माभिः बहुः किमपि ज्ञातुं शक्यते। जिज्ञासायां तत् संहितासाहित्यादारभ्य सूत्रसाहित्यं यावद् गणयितुं शक्यते। एतेषु सन्ति षड् वेदाङ्गानि। एतानि वेदपुरुषस्य प्रमुखान्यङ्गानि भवन्ति। प्राचीनतमः ऋग्वेदः कालक्रमेण शैलीदृष्ट्या ऋग्यजुःसाम इति वेदद्रयी' नाम्ना प्रसिद्धोऽभूत्। पुनश्च विषयदृष्टया वेदचतुष्टयः ऋग्यजुःसामाथर्वाख्यः इति ज्ञायते। एतादृशस्य वैदिकवाङ्मयस्य साक्षाद् अनुशीलनं सकृत्साध्यं न भवति। अतः साहित्यवाङ्मयात् अस्माभिः एतेषामर्थं ज्ञात्वा मानवजीवनं सुष्ठुः कर्तुं शक्यते। ततः कालिदासादीनां काव्यानि प्रख्यातानि। ततः अपि ज्ञानं प्राप्यते। यथा रघुवंशात् अस्माभि रामचरितं दृष्ट्वा कथं जीवने प्रवर्ततिव्यमिति ज्ञायते। रामायणादपि तथैव। महाभारतात् युधिष्ठिरादेः धर्मादिज्ञानं लभ्यते।

शिक्षा इति वेदानां मन्त्राणां स्वरसम्बन्धिज्ञानं शिक्षयति। प्राणेन्द्रियं विना उच्चारणं स्पष्टं न भवति। अतः शिक्षाग्रन्थः वेदपुरुषस्य प्राणत्वेन स्वीकृतः। मन्त्राणां प्रयोगः यज्ञेषु भवति। यज्ञानां विधानं कल्पशास्त्रे नाम श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्वसूत्रमन्थेषु वर्णितमस्ति। एतस्माद् अस्माभिः धर्मज्ञानं यज्ञविधानं च ज्ञायते।

चाणक्यप्रणीतार्थशास्त्राधारेण विशाखादत्तेन मुद्राराक्षसनाटकं व्यरचि। तत्र चाणक्यस्य गुणाः वर्णिताः। स बुद्धिबलेन नन्दस्यामात्यं राक्षसं चन्द्रगुप्तपक्षे नियोजयति। अमात्यः कार्यमारभ्य समाप्तिपर्यन्तं नयति। मध्ये न त्यजति। एतस्माद् राजनितीज्ञानं प्राप्यते। राष्ट्रस्य खण्डतायाः स्थापना सुरक्षा च राजधर्मः। भारतराष्ट्रस्य महिमानं प्रकटयता मनुना उच्यते।

**एतदेशप्रसूतस्य सकाशदग्रजन्मनः।**

**स्वं स्वं चरित्र शिक्षेरन् परथिव्या सर्वमानवा:**[16] ।।

राष्ट्रसंचालने कोशस्य महती आवश्यकताऽस्ति। एतदर्थं चाणक्येन वार्तायामन्तर्गतानां कृषिवाणिज्यगोपालनादीनां विकासोपाया: प्रदर्शिता: तदर्थ म्न्थेऽस्मिन् शुल्काध्यक्ष-सूत्राध्यक्ष-सीताध्यक्ष-सुराध्यक्ष-सूनाध्यक्ष-नावाध्यक्ष-गोध्यक्ष-अश्वाध्यक्ष-हस्त्यध्यक्ष-रथाध्यक्षादीनां नियुक्तिप्रकारं विधाय राजकोशविवर्धनाय नैके उपाया: प्रदशिता:। एतत्पठित्वा अस्माभि: राजकोशोपाया: ज्ञातुं शक्यते।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता: अथवा न गृहं गृहमित्याहु: गृहिणी गृहमुच्यते इति अवधारणां निर्वहति भारतीयसमाजे आदिकविना महर्षिवाल्मीकिना विरचिते आदिकाव्ये रामायणे कीदृशी आसीत् मर्यादापुरुषोत्तमस्य धर्मपत्न्या: सीताया: सामाजिकप्रतिष्ठा इति विचिकित्सा जायते मनसि। पुरुषनारीति जातिद्रयं विनिर्मितं भगवता सृष्टे: परिचालनार्थं न केवलं मनुष्यसमाजे, अपि तु इतरप्रजातिषु। तर्हिं समाजस्य समृद्धयर्थमुभयस्य कीदृशं योगदानमपेक्षितं भवति, कियद् वा बलिदानमावश्यकमिति विचारणीयं भवति अस्मिन् विघटनकाले। यतो हि मनस: परिवर्तनेन युगस्य परिवर्तनं भवति, अत: समाजस्य उन्नतये उभयस्य चिन्तने परिवर्तनस्य आवश्यकता दरीदृश्यते।

उपर्युक्ता: विषयादे: ज्ञानं प्राप्य अस्माभिस्समाजनिर्माणे आवश्यका: उपाया: गृहीतुं शक्यते। अत: एतेषां भूमिका अपरिसीमा।

## वंशीवनोदकाव्ये विविधा: सामाजिकपक्षा

सम्- पूर्वक- अज् धातो: निष्पन्न: समाजशब्द: सधर्मिणां समूहं सूचयति। सधर्मेतराणां समुह: समज: भवति। समज: नाम पशुनां समुह: 'समुदोरज: पशुषु'[17] इति सूत्रेण समज: पशुसमुदाय:। समज-समाजशब्दयो: केवलं आकरस्वरवर्णेन विशेष:।

समाजे केचन धर्मा: भवन्ति। इमे धर्मा: सम्प्रदायिका:, पारम्पारिका:, शास्त्रीया:, नयान्विताश्च। येषाम् अनुसरणं कुर्वतां व्यक्तिविशेषाणां समूह: एव समाज:। तत्समाजे निरन्तरघटनासु व्यक्तीनाम् अभिमते:, अवकाशानाम्, अपेक्षाणाञ्चानुसारं समाज: परिवर्तते। तत्र कारणं मनुष्याणां बुद्धे: विकास:। बुद्धिविकासेन अयं धर्म: युक्ततर: इति चिन्तयति स: एव सामाजिकसमुदायो भवति, सामाजिकधर्मी च। समाजात् वर्धित: समाजाय किं ददाति इत्यापि कश्चन धर्म: भवति। परिपालनेन अस्य धर्मस्य मानवा: सामाजिक-ऋणात् विमुच्यन्ते। तदर्थमेव इष्टापूर्तं कल्प्यते। इष्टमित्यनेन शास्त्रप्रतिबोधितं कर्म यागादि:, आपूर्तं नाम समाजोपयोगी वापि-कूपादि:। तडागधनविक्षेपब्रह्मताप्यसुरालया:, उद्यानग्रन्थलेखनधर्मशालादिना मानवकल्पितेन च मानवा: सामाजिकऋणात् विमुक्ता: भवन्ति। एते सर्वेऽपि सामाजिकोपयोगिन:। तेषु ग्रन्थलेखनम् अन्यतमम्। कवि: स्वयम् अधीयान: चिन्तनं कुर्वन् सामाजिकम् अनुभवं प्राप्नुवन् ग्रन्थान् रचयति, तद्द्वारा समाजाय कमपि सन्देशं प्रयच्छति। यथा कालिदासेन नाटकत्रय्यां धर्मार्थकामा: प्रधानतया स्वीकृत्य शृङ्गारेण समायोजिषत। तत्र अभिज्ञानशाकुन्तले धर्मपुरुषार्थप्रधान: शृङ्गार:, मालविकाग्निमित्रे अर्थपुरुषार्थप्रधान: शृङ्गार:, विक्रोमोर्वशीये कामपुरुषार्थप्रधान: शृङ्गार: उपोषिषत। एतत् शृङ्गाररसमाध्यमेन धर्मार्थकामा: समाजाय प्रादर्शिषत। इदमेव कर्तव्यं कवे: सामाजिकसेवाद्वारा तदृणादे: मोचनाय। न केवलं कवे: बुद्धिजीविनां सर्वेषामपि इदमेव कर्तव्यम्।

समाजहितकारिषु प्रतिपादितेषुविषयेषु केचन अत्र उदाह्रियन्ते।

**हिंसा न लोभमदमत्सरताश्च मोह: कामा भवन्ति न सखे ! मुरलीसमीपे ।**[18]

---

16. 94

17. अष्टाध्यायी- 3-3-69

एतस्माद् हिंसालोभमदमत्सरमोहकामाः न स्वीकर्तव्याः ज्ञायते।

अखिलं जगत् केशववंशी निर्माति। एनां विना न भवति रासलीला। न भवति जयदेवकाव्यम्। तथा वंशीं विना राधिकायाः सत्त्वा नैव तिष्ठति। कृष्णस्य मनसि यदा सृष्टिरूपविचित्रचिन्तनमागच्छति, तदा तस्मिन् मनसि अनुरागः वंश्येव उत्पादयति। सनातनधर्मस्य गौडीयधर्मरचनायां सा भविति पटुः। अर्थात् धर्मसृष्टौ अपि तस्याः कर्तृत्वम्।

शुन्यं निरीक्ष्य आत्मत्यागी जीवति। भोगीनां समीपे वंशी एकः धनवस्तुः, वैज्ञानिकाः परीक्षणाय व्यवहरति ताम्। कविः तं भावं रसं मधुमयं इति रूपेण शब्दायते।

वंशीस्वनश्च भवति नटनागराणां रमणकार्ये भ्रमरः इव रसोत्पादको भवति। एनां विहाय कृष्णस्य परिचय एव न तिष्ठति। अतः एवं वक्तुं शक्यते सा कृष्णस्य परिचायकः।

**वंशीस्वनेन रमणं नटनागरोऽसौ कृत्वा मुखान्मधुपवद्रसमुज्जहार।**

**वंश्येव मोहनकरी ब्रजसुन्दरीणां वंशीधरोऽपरिचित मुरली विहाय ।।**

**कृष्णो यदा रहसि वंश्यनुचुम्बति त्वां प्रीत्या तदा नटवरस्य च सा नताङ्गी।**

**संस्थाप्य वै शिरसि बार्हिणचन्द्रिका ते गङ्गेव पश्यति रतिं हरपार्वतीयाम्।।**

**कृष्णवंश्योः प्रीतिरूपपारस्परिकसम्बन्धः चन्द्रगङ्गयोः हरपार्वत्योः तुल्यते।**[19]

**सन्दर्भग्रन्थसूची-**


1. अलङ्कारशास्त्रस्येतिहासः, डॉ. जगदीशचन्द्रमिश्रः, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी 1986
2. अलङ्कारशास्त्रेतिहासः, डॉ. जगदीशचन्द्रमिश्रः, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी 1999
3. वंशीविनोदः डॉ. सोमनाथदाशः, संस्कृताग्रिमगवेषणाप्रतिष्ठानम्, पुरी उडिशा, 2011
4. विष्णुपूराणम् व्यासः,गीताप्रेस, गोरखपुरः
5. संस्कृतसाहित्यस्य इतिहासः प्रो. हरेकृष्णशतपथी किताबमहल, कटक 1998
6. सरस्वतीकण्ठाभरणम् भोजदेवः डॉ. विश्वनाथगो शास्त्रीपरिमल पब्लिकेसन्, दिल्ली
7. भक्ति रसायनम्, देवकीनन्दनग्रन्थालयः 1969


[18]. वं.वि- 21

[19]. वं.वि-25-27